# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**– शास्त्री (SEM-5) | **प्रश्नपत्रम्**–५ (New & Old) | **गुणाः** – ७० |
| **विषयः** – धर्मशास्त्रम् | **कोड**- **C C - 3.5.9.** | **समयः** – १० तः १ |
| **दिनाङ्कः** – ०८/१२/२०१८ | **सन्दर्भग्रन्थः**– याज्ञवल्क्यस्मृतिः (प्रायश्चित्ताध्यायः) | |

**॥ प्रथमान्वितिः ॥**

**प्र–१ द्वयोरेव मिताक्षरा व्याख्या विधेया ।** **१०**

१. पाखण्ड्यनाश्रिताः स्तेना भर्तृघ्नः कामगादिकाः ।
सुराप्य आत्मत्यागिन्यो नाशोचोदकभाजनाः ॥

२. त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते ।
उनद्विवर्षे उभयोः सूतकं मातुरेव हि ॥

३. लाक्षालवणमांसानि पतनीयानि विक्रये ।
पयो दधि च मद्यं च हीनवर्णकराणि तु ॥

**प्र–२ आशौचप्रकरणे वर्णितानां विषयाणां निबन्धकौशल्या वर्णनं कुरुत ।** **१०**

**अथवा**

**उनद्विवर्षस्य जातकस्य मरणे को विधिः ? ग्रन्थानुसारेण वर्णयत ।**

**॥ द्वितीयान्वितिः ॥**

**प्र–३ द्वयोरेव मिताक्षरा व्याख्या विधेया ।** **१०**

१. सुतविन्यस्तपत्नीकस्तया वाऽनुगतो वनम् ।
वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत् ॥

२. ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थडिलेशयः ।
आर्द्रवासास्तु हेमन्ते शक्त्या वापि तपश्चरेत् ॥

३. सर्वभूतहितः शान्तः त्रिदण्डी सकमण्डलुः ।
एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत् ॥

**प्र–४ शास्त्रानुसारेण चान्द्रायणविधेः उपयोगितां वर्णयत ।** **१०**

**अथवा**

**भिक्षाचरणे प्रयुक्तानां यतिपात्राणां वर्णनं कुरुत ।**

## ॥ तृतीयान्वितिः ॥

**प्र-५ द्वयोरेव मिताक्षरा व्याख्या विधेया ।** **१०**

१. यथाकर्म फलं प्राप्य तिर्यक्त्वं कालपर्ययात् ।
   जायन्ते लक्षणभ्रष्टा दरिद्राः पुरुषाधमाः ॥

२. देशं कालं वयः शक्तिं पापं चावेक्ष्य यत्नतः ।
   प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र योक्तान निष्कृतिः ॥

३. विद्यार्थी प्राप्नुयाद्विद्यां धनकामो धनं तथा ।
   आयुष्कामस्तथैवायुः श्रीकामो महतीं श्रियम् ॥

**प्र-६ ग्रन्थानुसारेण प्रायश्चित्तप्रकरणस्य सारांशो लेख्यः ।** **१०**

**अथवा**

**गुरुपत्नीगमने लिङ्गच्छेदनं प्रायश्चित्तम् अत्र विवेकपुरस्सरं स्वविचारान् लिखत ।**

## ॥ चतुर्थान्वितिः ॥

**प्र-७ दशप्रश्नानां लघूत्तराणि यच्छत ।** **१०**

१. उनद्विवर्षं प्रेतं कुत्र निखनेत्?
२. निःसारे शरीरे कः सम्मूढः ?
३. सद्यः शौचं कुत्र कुत्र विधीयते?
४. वानप्रस्थशब्दस्य कोऽर्थः ?
५. यतिपात्राणां शुद्धिः केन भवति?
६. संयुक्तशुक्रशोणितस्य प्रथमे मासिकः परिणामः ।
७. पुरुषस्य शरीरे कति अस्थीनि?
८. कानि प्राणस्यायतनानि?
९. कानि नवच्छिद्राणि?
१०. गोघ्नः किं पिबेत्?
११. ब्राह्मणी यदि सुरां पिबति तर्हि सा पतिर्लोकं याति न वा?
१२. प्रायश्चित्ताध्याये कति प्रकरणानि?
१३. याज्ञवल्क्यस्मृतौ कति अध्यायाः?
१४. अस्यां स्मृतौ मिताक्षराव्याख्या केन लिखिता?
१५. याज्ञवल्क्यस्य गुरोर्नाम किम्?

—००—